## प्रथमाध्यायस्य चतुर्थः पादः

### आ कडारादेका सञ्ज्ञा । (१/२३२)

'कडाराः कर्मधारये' (२.२.३८/७५१) इति वक्ष्यति । आ एतस्मात् [1]सूत्रावधेर्यदित ऊर्ध्वमनुक्रमिष्यामः, तत्र [2]एका सञ्ज्ञा भवति [3]इति वेदितव्यम् । का पुनरसौ ? या परा अनवकाशा [4]च । अन्यत्र सञ्ज्ञासमावेशान् नियमार्थं [5]वचनम् [6]एकैव सञ्ज्ञा भवति इति । [7]वक्ष्यति–'ह्रस्वं लघु' (१.४.१०/३१), [8]भिदि, छिदि–[9]भेत्ता, छेत्ता (७.३.८६/२१८९) । 'संयोगे गुरु' (१.४.११/३२), [10]शिक्षि, भिक्षि–शिक्षा, भिक्षा (३.३.१०३/३२८०) । संयोगपरस्य ह्रस्वस्य लघुसञ्ज्ञा प्राप्नोति, [11]गुरुसञ्ज्ञा च । एका सञ्ज्ञा इति वचनाद् गुरुसञ्ज्ञा एव भवति । अततक्षत्, [12]अररक्षत्, '[13]सन्वल्लघुनि चङ्परेऽनग्लोपे' (७.४.९३/२३१६) इत्येष विधिर्न भवति ॥

### विप्रतिषेधे परं कार्यम् । (२/१७९)

[14]तुल्यबलविरोधो विप्रतिषेधः । यत्र [15]द्वौ प्रसङ्गावन्यार्थावेकस्मिन् युगपत् प्राप्नुतः, [16]स तुल्यबलविरोधो विप्रतिषेधः (म. भा. १.३००) । तस्मिन् विप्रतिषेधे [17]परं कार्यं भवति ।

उत्सर्गापवादनित्यानित्यान्तरङ्गबहिरङ्गेषु तुल्यबलता नास्ति इति नायमस्य योगस्य विषयः । बलवतैव तत्र भवितव्यम् । [18]अप्रवृत्तौ, पर्यायेण [19]वा प्रवृत्तौ प्राप्तायां [20]वचनमारभ्यते । 'अतो दीर्घो यञि' (७.३.१०१/२१७०)[21], 'सुपि च' (७.३.१०२/२०२) इत्यस्यावकाशः – वृक्षाभ्याम्, [22]प्लक्षाभ्याम् । 'बहुवचने झल्येत्' (७.३.१०३/२०५) [23]इत्यस्यावकाशः – वृक्षेषु, [24]प्लक्षेषु । इहोभयं प्राप्नोति–वृक्षेभ्यः, प्लक्षेभ्यः इति । परं[25] भवति विप्रतिषेधेन ॥

### यू स्त्र्याख्यौ नदी । (३/२६६)

ई च ऊ च यू । अविभक्तिको[26] निर्देशः । स्त्रियमाचक्षाते[27] स्त्र्याख्यौ । मूलविभुजादि[28]दर्शनात् (३.२.५/२९१९ वा.) कप्रत्ययः । ईकारान्तमूकारान्तं च [29]स्त्र्याख्यं शब्दरूपं नदीसञ्ज्ञं भवति । ईकारान्तम्–कुमारी । [30]गौरी । लक्ष्मीः । [31]शार्ङ्गरवी । ऊकारान्तम्–[32]ब्रह्मबन्धूः । यवागूः । यू इति किम् ? मात्रे[33] । दुहित्रे । स्त्र्याख्यौ इति किम् ? ग्रामणीः । [34]सेनानीः । खलपूः । आख्याग्रहणं किम् ? शब्दार्थे स्त्रीत्व [35]एव यथा स्यात्, [36]पदान्तराख्ये मा भूत्, [37]ग्रामण्ये स्त्रियै (म. भा. १.३१३) । [38]खलप्वे स्त्रियै । नदीप्रदेशाः–'आण्नद्याः' (७.३.११२/२६८) [39]इत्येवमादयः ॥

---

1. कडारसूत्रावधेः क, °वधेर्यानि इत अ, यान् इत ह. 2. एकस्य क, एकसञ्ज्ञा अ. 3. इत्येवं ड.ह. 4. च नास्ति ह. 5. एतद्वचनम् ह. 6. एकस्यैव फ, एकैव च ह. 7. वक्ष्यति नास्ति ड. ह. 8. भिद् छिद् क. 9. भेत्ता छेत्ता नास्ति अ. ई. फ. 10. शिक्ष, भिक्ष क. 11. चन्द्रिकासञ्ज्ञा ह. 12. अररक्षत् नास्ति ब. 13. सन्वल् नास्ति फ. 14. तुल्यबल नास्ति ब. ड. ह. फ. ई. 15. च इत्यधिकम् फ. 16. स विप्रतिषेधः ब. ड. 17. परे क. 18. अप्राप्तौ अ. 19. चाप्रवृत्तौ ब, वा प्राप्ते ह. 20. वचनमिदमा° अ, इदमारभ्यते फ. 21. वृक्षाय इत्यधिकम् क. 22. प्लक्षाभ्याम् नास्ति ह. 23. इत्यस्यायम् क. 24. प्लक्षेषु नास्ति फ. 25. एत्वं भवति अ. 26. °कोऽयं क. ड. ह. 27. यौ तौ इति इत्यधिकम् क, इति इत्यधिकम् अ. ड. ह. 28. °दिषु क. 29. स्त्रियाख्यं ह. 30. किशोरी क. फ. 31. नास्ति ब. फ. ई. 32. वीरबन्धूः अ, जीवबन्धूः क. 33. मात्रे देहि अ, दुहित्रे नास्ति अ. 34. नास्ति अ. क. फ. 35. एव नास्ति ह. 36. पदान्तरद्योत्ये अ. क. ड. फ. 37. ग्रामण्यै फ. ह. 38. उदाहरणमिदं नास्ति ह. 39. अम्बार्थनद्योर्ह्रस्वः इत्यधिकम् अ.